राजा स्वतन्त्रो भवति। तानि चोक्तानि नीति-
शास्त्रे यथा,—
'मन्त्री पुरोहितश्चैव युवराजश्च भूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वंशिकस्तथा॥
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः॥
प्रदेष्टा नगराध्यक्षः कार्य्यनिर्म्माणकृत्तथा।
धर्म्माध्यक्षः सभाध्यक्षो दण्डपालस्त्रिपञ्चमः॥
षोड़शो दुर्गपालश्च तथा राष्ट्रान्तपालकः।
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु॥
चारान् विचारयेत्तीर्थे स्वात्मनश्च परस्य च।
पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि॥
मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितम्॥'
इत्येषां तीर्थशब्दवाच्यत्वम्॥ हलायुधः।
योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि।
पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात् दर्शनेष्वपि॥"
इति तट्टीकायां नीलकण्ठः॥)
योनिः। दर्शनम्। चक्रः। इति हेमचन्द्रः॥
विप्रः। आगमः। निदानम्। अग्निः। इति
संक्षिप्तसारे उणादिवृत्तिः॥ (पुण्यकालः।
इति स्वामी॥ यथा, भागवते। १। १२। १४।
"हिरण्यं गां महीं ग्रामान् हस्त्यश्वान् नृपतिर्वरान्।
प्रादात् स्वन्नञ्च विप्रेभ्यः प्रजातीर्थे स तीर्थवित्॥"
पुं. सन्यासिनामुपाधिविशेषः। यथा, प्राण-
तोषिण्यां व्यवधूतप्रकरणे।
"त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे।
स्नायात्तत्त्वार्थभावेन तीर्थनामा स उच्यते॥")
तीर्थकरः, पुं, (करोतीति करः। तीर्थस्य शास्त्रस्य
पुण्यक्षेत्रस्य वा करः।) जिनः। इति हेम-
चन्द्रः। १। २४॥ (विष्णुः। यथा, महा-
भारते। १३। १४६। ८७।
"मनोयवस्तीर्थकरो वसुरेता वसुप्रदः॥"
"चतुर्द्दशविद्यानां वाह्यविद्यासमयानाञ्च प्रणेता
प्रवक्ता चेति तीर्थकरः।" इति तद्भाष्यम्॥)
तीर्थकृत्, पुं, (तीर्थं करोतीति। कृ+क्विप्
तुगागमश्च।) जिनः। इति धरणिः॥
तीर्थङ्करः, पुं, (तीर्थं करोतीति। कृ+खच् मुम् च।)
जिनः। इति हेमचन्द्रः। १।२४॥
तीर्थयात्रा, स्त्री, (तीर्थे यात्रा गमनम्।) तीर्थ-
गमनम्। तद्विधिनिषेधौ यथा,—
ऋषय ऊचुः।
"कर्त्तव्या तीर्थयात्रास्मिन् लोके केन कथं द्विजैः।
श्रोतुं न एतदिच्छामो वद वह्निमतान् मुने!॥
सूत उवाच।
'एतत् श्रुत्वा ततः सूतः पुराणे मुनिसत्तमः।
प्रोवाच तान् मुनिश्रेष्ठान् स्वधर्म्मं शृणुतानघाः॥
यत्राधिकारे च गते द्विजेन्द्राः
सर्व्वस्वनाशे क्षितिपोऽथ वैश्यः।
शुश्रूषणायां बलवीर्य्यहीनः
शूद्रस्तु तीर्थानि भजेत् सुदान्तः॥
समस्तुभिस्तीर्थगतिर्मुनीन्द्रैः
काम्या तथा तत्फलकाङ्क्षिभिश्च।
तां ब्रह्मचारी विधिवत् करोति
स्वयं यतो गुरुणा सन्नियुक्तः॥
नित्यं गृहस्थाश्रमसंस्थितस्य
मनीषिभिस्तीर्थगतिर्निषिद्धा।
मातुः पितुर्भक्तिमना गृहस्थः
सुतो न कुर्य्यात् खलु तीर्थयात्राम्॥
गङ्गाजलेनानुदिनं मनुष्यो
गृह्नोमयेनापि सदा मुनीन्द्राः।
स्नातीह सम्यक् यदि भावशुद्धः
फलं तदाप्नोति न चान्यदेतत्॥
सर्व्वाणि तीर्थानि हि यानि तानि
स्वर्गेऽन्तरीक्षेऽपि पुनः पृथिव्याम्।
तुल्यानि सम्यक् मुनयोऽग्निहोत्रं
सत्यं गृहस्थाश्रमसंश्रितस्य॥
यस्येह यज्ञेष्वधिकारितास्ति
गृहेऽन्वहं दानवतो मुनीन्द्राः।
संजुह्वतः कल्कविवर्ज्जितस्य
तीर्थे गतिः पूर्व्वतरैर्निषिद्धा॥"
इति वह्निपुराणे १ अध्यायः॥
तीर्थराजी, स्त्री, (तीर्थानां राजी श्रेणिरिव।
यद्वा, तीर्थेषु राजते शोभते इति। राज+इन्।
ततो वा ङीष्।) काशी। इति त्रिकाण्डशेषः॥
तीर्थवाकः, पुं, (तीर्थस्येव वाको वचनमस्य।
उत्तमाङ्गस्थित्या प्रशंसनीयत्वादस्य तथात्वम्।)
केशः। इति हेमचन्द्रः। ३। २३१॥
तीर्थसेवी, [न्] पुं स्त्री, (तीर्थं घट्टादिजल-
प्रान्तस्थानं सेवते इति। सेव+णिनिः।) बक-
पक्षी। इति राजनिर्घण्टः॥ तीर्थवासिनि, त्रि॥
तीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वां-परं-
अकं-सेट्।) तीवति। इति दुर्गादासः॥
तीवरः, पुं, (तीर्य्यते इति। तॄ प्लवनतरणयोः+
"छित्वरच्छत्वरेति।" उणां ३। १। इति
ष्वरच्प्रत्ययेन निपातनात् साधुः।) समुद्रः।
(तीरयति कर्म्मसमाप्तिं करोतीति। तीर+
ष्वरच्। गुणाभावो रेफलोपश्च। इत्युज्ज्वल-
दत्तः।) व्याधः। इति मेदिनी। रे, १६३॥
वर्णसङ्करजातिविशेषः। तेओर इति भाषा।
स तु राजपुत्रस्त्रियां क्षत्त्रियाज्जातः। इति
ब्रह्मवैवर्त्तम्॥ चूर्णकभार्य्यायां पुण्ड्रकाज्जातः।
इति पराशरपद्धतिः॥
तीवरी, स्त्री, (तीवर+षित्त्वात् ङीष्।) व्याध-
पत्नी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
तीव्रं, क्ली, (तीव स्थौल्ये+बाहुलकात् रक्।
तिज निशाने+बाहुलकात् रन्। दीर्घत्वम्।
जकारस्य वकारः। इत्युज्ज्वलदत्तः। २।२८॥)
अतिशयः। इत्यमरः। १। २। ७०॥ तीरम्।
तीक्ष्णम् त्रपु। इत्युणादिकोषः॥ लोहम्। इति
राजनिर्घण्टः॥
तीव्रः, त्रि, (तिज+बाहुलकात् रन्।) दीर्घत्वादि-
कञ्च। उत्कटः। नितान्तः। (यथा, रघुः। ६। ६५।
"तान् हत्वा गजकुलबद्धतीव्रवैरान्
काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान्॥")
कटुः। इत्युणादिकोषः॥ (दुःसहः। यथा,
आर्य्यासप्तशत्याम्। ६६१।
"हन्त विरहः समन्ताज्ज्वलयति दुर्व्वारतीव्र-
संवेगः॥"
तीक्ष्णम्। यथा, तत्रैव। १५२।
"कृतकस्वाप मदीयश्वासध्वनिदत्तकर्ण! किं तीव्रैः।
विध्यसि मां निश्वासैः स्मरः शरैः शब्दवेधीव॥")
शिवे, पुं। इति शब्दरत्नावली॥
तीव्रकण्ठः, पुं, (तीव्रः कण्ठो यस्मात्। अस्य
भक्षणेन हि कण्ठदेशे पीड़ोत्पत्तेस्तथात्वम्।)
शूरणः। इति राजनिर्घण्टः॥
तीव्रगन्धा, स्त्री, (तीव्रः कटुर्गन्धो यस्याः।)
यवानी। इति राजनिर्घण्टः॥
तीव्रज्वाला, स्त्री, (तीव्रं यथा स्यात् तथा ज्वाल-
यति उत्तेजयति सेविनमिति। ज्वल+णिच्+
अच् टाप् च।) धातकी। इति राजनिर्घण्टः॥
तीव्रवेदना, स्त्री, (तीव्रा अत्यन्ता वेदना।)
यातना। अतिशयवेदना। इत्यमरः। १।१०।३॥
तीव्रा, स्त्री, (तीव्र+टाप्।) कटुरोहिणी।
गण्डदूर्व्वा। राजिका। इति मेदिनी। रे, ४५॥
नदीविशेषः। इति शब्दरत्नावली॥ महा-
ज्योतिष्मती। तरदीरुचः। तुलसी। इति
राजनिर्घण्टः॥
तु, ल वृत्तौ। हिंसायाम्। पूर्त्तौ। इति कविकल्प-
द्रुमः॥ (अदां-परं-अकं-सकं च-सेट्।) ल,
तौति तवीति। इति दुर्गादासः॥
तु, व्य, पादपूरणम्। (यथा, मनुः। ११। २०७।
"अवगूर्य्य त्वब्दशतं सहस्रमभिहत्य च।
जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते॥")
भेदः। अवधारणम्। इत्यमरः॥ समुच्चयः।
(यथा, मनुः। ११। २०२।
"उष्ट्रयानं समारुह्य खरयानन्तु कामतः।
स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन
शुध्यति॥")
पक्षान्तरम्। नियोगः। प्रशंसा। विनिग्रहः।
इति शब्दरत्नावली॥
तुक्, [ज्] पुं, (तुज्यते जीर्य्यतेऽनेनेति। तुज
प्राणे+क्विप्।) अपत्यम्। इति हेमचन्द्रः॥
तुकाक्षीरी, स्त्री, (तुगाक्षीरी+पृषोदरादित्वात्
गस्य कः।) तुगाक्षीरी। इति हेमचन्द्रः। ४।२२०॥
तुगा, स्त्री, (तुज+बाहुलकात् घः किच्च।) वंश-
लोचना। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या
यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"स्याद्वंशरोचना वंशी तुगाक्षीरी तुगा शुभा।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी॥")
तुगाक्षीरी, स्त्री, (तुगा सा एव क्षीरी।) वंश-
लोचना। इति राजनिर्घण्टः॥ वंशलोचना-
भेदः। अस्या गुणाः। क्षयश्वासकासनाशि-
त्वम्। मधुरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥
(यथा, भावप्रकाशे मध्यखण्डे २ भागे काश-
रोगाधिकारे।
"द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा॥")